# श्रीकमलजदयिताष्टकं

शृङ्ग क्ष्माभृन्निवासे शुक मुख मुनिभिः सेव्यमानाङ्घ्रि पद्मे
स्वाङ्गच्छाया विधूतामृत कर सुरराड्वाहने वाक्स वित्रि ।
शम्भु श्रीनाथ मुख्या मरवरनिकरैर् मोदतः पूज्यमाने
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ॥ १॥

कल्यादौ पार्वतीशः प्रवर सुरगण प्रार्थितः श्रौतवर्त्म
प्राबल्यं नेतुकामो यति वर वपुषागत्य यां शृङ्गशैले ।
संस्थाप्यार्चां प्रचक्रे बहुविध नुतिभिः सा त्वमिन्द्वर्धचूडा
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ॥ २॥

पापौघं ध्वंसयित्वा बहुजनि रचितं किं च पुण्यालिमारात्
सम्पाद्यास्तिक्य बुद्धिं श्रुतिगुरु वचनेष्वादरं भक्ति दार्ढ्यम् ।
देवाचार्य द्विजादिष्वपि मनु निवहे तावकीने नितान्तं
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ॥ ३॥

विद्या मुद्राक्षमाला मृतघट विलस त्पाणि पाथोज जाले
विद्यादान प्रवीणे जडबधिर मुखेभ्योऽपि शीघ्रं नतेभ्यः ।
कामादीनान्तरान्म त्सहज रिपु वरान्देवि निर्मूल्य वेगात्
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ॥ ४॥

कर्म स्वात्मोचितेषु स्थिरतर धिषणां देह दार्ढ्यं तदर्थं
दीर्घं चायु र्यशश्च त्रिभुवन विदितं पापमार्गा द्विरक्तिम् ।
सत्सङ्गं सत्कथायाः श्रवणमपि सदा देवि दत्त्वा कृपाब्धे

विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ॥ ५॥

मातस्त्वत्पाद पद्मं न विविध कुसुमैः पूजितं जातु भक्त्या
गातुं नैवाहमीशे जडमति रलसस् त्वद्गुणां दिव्यपद्यैः ।
मूके सेवा विहीनेऽ प्यनुपम करुणां अर्भकेऽम्बेव कृत्वा
विद्यां शुद्धां च बुद्धिं कमल जदयिते सत्वरं देहि मह्यम् ॥ ६॥

शान्त्याद्याः सम्पदो मे वितर शुभ करी र्नित्यतद् भिन्नबोधं
वैराग्यं मोक्ष वाञ्छा मपि लघु कलय श्रीशिवा सेव्यमाने ।
विद्या तीर्थादि योगि प्रवर कर सरोजात सम्पूजि ताङ्घ्रे
विद्यां शुद्धां च बुद्धिं कमल जदयिते सत्वरं देहि मह्यम् ॥ ७॥

सच्चिद्रूपात्मनो मे श्रुति मनन निदिध्यास नान्याशु मातः
सम्पाद्य स्वान्त मेतद्रुचियुत मनिशं निर्विकल्पे समाधौ ।
तुङ्गा तीराङ्कराजद्वर गृह विलस च्चक्रराजासनस्थे
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ॥ ८॥

इति शृङ्गेरि श्रीजगद्गुरु श्रीसच्चिदानन्द शिवाभिनवनृसिंह-
भारती स्वामिभिः विरचितं श्रीकमलज दयिताष्टकं सम्पूर्णम् ।